शा०दू०

४

वा उभयत्राप्येकतरांगीकारेत्तृतीयादिसंभावा नास्यात् यद्यन्यमात्रं द्वितीयं सदद्वितीयं ५

वाकश्चिदिति न प्रथमपक्षः तथासति बुद्धेरपि मिथ्यात्वप्रसंगात् तत्कुत इति चेत्तस्यापि दृश्यतेत्वत्रयाकश्चात्म

त्मावाश्रेयःसूक्ष्मः श्रोतव्य इति दृश्यत्व श्रुतत्वप्रतिपन्नत्वात् न द्वितीयः रज्जुसर्पादेर्दृश्यत्वमिथ्यात्वस्यतवा

नभिमतत्वात् प्रपंचेतद्बाध इति चेन्न यावद्दृश्यत्वमात्रस्य दोषजन्यत्वाभावात् नहि हृस्थरजतं मयादृ

ष्टमित्युक्ते कश्चिदनुभवो मिथ्येति ब्रवीति अन्यत्तु एकमेवाद्वितीयमित्यत्र नाद्वितीयं तदद्वितीयं न यस्य द्वि

तीयं तदद्वितीयैरावृत्तेर्हि एकपदस्य वैयर्थ्यं अद्वितीयपदेनैव चरितार्थत्वात् नहि लोके द्वितीयत्वं पुरुषापेक्ष

याकश्चिद्ब्रूते किंतु समानेरव तथात्वेतु न तत्समश्चाभ्यधिकश्च दृश्यते इत्यादिश्रुतेर्भेद एव सिद्ध इति किंना

भेदोयं कीदृशोभिमतः भेदस्त्वोभेदाविरोधी भेदाभावो वा न प्रथमः अद्वितीयैर्भेदानपगमात् तृतीयेपि किंप्रमाणं

न किंचिदिति चेत्तदा स्वदिष्टसिद्धिरिति चिरंजीवतु भवान् यदि किंचिन्मानमुच्यते तदा पुनर्भेदापत्तिः मानाभा

वाद्भेदाभावं यो वदेत्स तु देवानांप्रियः यदि भेदाभावे मानाभाव एवाभिमतस्तदा अपूर्वमाणिक्यमेवेति यदि भेदाभाव

स्वतःसिद्ध इति वदेस्तर्हि भेदस्यापि स्वतःसिद्धत्वं किं न स्यात् प्रमाणमात्रस्य सदोषत्वे तु तस्य मानता नांगीक्रियते रामः

परीक्षकारिभिः तस्मात् प्रमाणस्य पारमार्थिकत्वमंगीकार्यं अन्यथा स्वाभिमतार्थासिद्धिः प्रमाणपारमार्थ्यं तु ४

तः प्रविश्यनियंतृत्वमुक्तंपरिवृहेवजीवमस्तंतदास्वस्यस्वयमेवनियंतेत्यग्निरात्मानंदहतीतिवदस
मंजसमेवेतिनहि लोकेराजास्वस्यस्वयमेवनियंताकिंतुस्वपरिकरस्यैवेति अपरंचपरमात्मानंप्रे
१३ रितारंचमत्वाजुष्टस्ततस्तेनामृतत्वमेतीतिश्रुत्याजीवेश्वरभेदज्ञानस्यैवमोक्षहेतुत्वश्रवणात् त्व
दुक्ताभेदज्ञानस्यचगौणीसामर्थ्यमेवनचवाक्यं आत्मानमेवनियंतारंदेहात्पृथङ्मत्वेतितस्याअर्थइति
देहपदाध्याहारप्रसंगात् तेनाविनावाक्यान्वयेसंभवतितद्योगात् चकारवैयर्थ्यापातात् तमा
त्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषां अन्यांतरं ब्रह्मविदोविदित्वालीनाब्रह्मणितत्प
रायोनिमुक्ताः प्रधानदेहत्वापातिगुलिप्तां क्षरंप्रधानममृताक्षरंहरः क्षरात्मानावीशतेदेवएक इ
त्यादिषुसर्वात्मत्वसर्वपतित्वसर्वेशितृत्वादिनाविलक्षणस्यपरमात्मनःप्रतिपन्नत्वेनतद्विरोधात्
जुष्टस्ततस्तेनेतितृतीयांततत्कृत्वस्यार्थालाभात् देहविलक्षणस्यात्मज्ञानानंतरंहेयदेहजुष्टत्वासंगतेः
अमृतत्वमेतीतिदेहसहितमोक्षप्राप्तिप्रतिपादनासंभवाच्च अतैस्त्वदुक्तंप्रलापमात्रमेवेति किंचद्वयस्यतेअ
तोपिचेतिवाक्यमवलंब्यत्वयाजगतोमिथ्यात्वंप्रतिपाद्यते तत्रकिंदृश्यत्वमात्रंमिथ्यात्वेहेतुरुततद्विशेषो